## अन उपधालोपिनोऽन्यतरस्याम्। (२८/४६२)

बहुव्रीहेरित्येव। [1]अन्नन्तो यो बहुव्रीहिः उपधालोपी, तस्मादन्यतरस्यां ङीप् प्रत्ययो भवति। ङीपा मुक्ते [2]डाप्प्रतिषेधौ भवतः। किमर्थं तर्हि इदमुच्यते, ननु[3] सिद्धा एव डाप्प्रतिषेधङीपः[4]? अनुपधालोपिनः ङीप्प्रतिषेधार्थं वचनम्। बहुराजा, बहुराज्ञी, [5]बहुराजे। बहुतक्षा, बहुतक्ष्णी, बहुतक्षे। अनः इति किम्? बहुमत्स्या। उपधालोपिनः इति किम्? [6]सुपर्वा, सुपर्वे, सुपर्वाः। सुपर्वाणौ, [7]सुपर्वाणः। डाप्प्रतिषेधावेवात्र [8]भवतः॥

## नित्यं सञ्ज्ञाछन्दसोः। (२९/४८७)

अन्नन्ताद् बहुव्रीहेरुपधालोपिनः सञ्ज्ञायां विषये छन्दसि च नित्यं ङीप् प्रत्ययो भवति। [9]विकल्पस्यापवादः। सुराज्ञी, अतिराज्ञी नामः ग्रामः। छन्दसि – [10]गौः पञ्चदाम्नी। एकदाम्नी। [11]द्विदाम्नी। 'एकमूर्ध्नी' (अ.वे. ८.९.१५)। 'समानमूर्ध्नी' (तै.सं. ४.३.११.४)[12]॥

## केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च। (३०/४८८)

सञ्ज्ञाछन्दसोः (४. १. २९/४८७) इत्येव। केवलादिभ्यः प्रातिपदिकेभ्यः सञ्ज्ञायां, छन्दसि[13] विषये स्त्रियां ङीप् प्रत्ययो भवति। 'केवली' (पै. १६.२०.१)। [14]केवला इति भाषायाम्। 'मामकी' (पै.१.६.८)। [15]मामिका इति भाषायाम्। 'मित्रावरुणयोर्भागधेयीः स्थ' (तै. १. ३. १२. १)। भागधेया इति भाषायाम्। 'सा पापी' (मै. ४. २. १४)। पापा इति भाषायाम्। '[16]उताऽपरीभ्यो मघवा विजिग्ये' (ऋ. १. ३२. १३)। अपरा इति भाषायाम्। '[17]समानी' (ऋ. १०.१९१.३) प्रकाणी। समाना इति भाषायाम्। 'आर्यकृती' (मै. १.८.३)। आर्यकृता इति भाषायाम्। 'सुमङ्गली' (ऋ.१०.८५.३३)। सुमङ्गला इति भाषायाम्। 'भेषजी' (तै. ४.५. १०. १)। भेषजा इति भाषायाम्॥

## रात्रेश्चाजसौ। (३१/३४४७)

जस्विषयादन्यत्र सञ्ज्ञायां छन्दसि च रात्रिशब्दात् ङीप् प्रत्ययो भवति। [18]या च रात्री सृष्टा। 'रात्रीभिः' (ऋ. १०.१०.९)। अजसौ इति किम्? यास्ता रात्रयः।

[३४३] अजसादिष्विति वक्तव्यम्। (म.भा.२. २१३)

[19]रात्रिं सहोषित्वा (म.भा.२.२१३)। कथं तिमिरपटलैरवगुण्ठिताश्च राज्यः? ङीषयं बह्वादिलक्षणः। तत्र हि पठ्यते 'कृदिकारादक्तिनः' (ग.सू. ५०), 'सर्वतोऽक्तिन्नर्थात् इत्येके' (ग.सू. ५१) इति॥

---

1. अनन्तो ह. 2. ङीप् क, डाब्विधिप्रतिषेधौ ब, डाप्प्रतिषेधो भवति ह. 3. च इत्यधिकम् क. 4. पूर्वेण इत्यधिकम् ड. ह. 5. नास्ति ह. 6. सुपर्वा, सुपर्वे नास्ति ह. 7. सुपर्वाणः नास्ति ग. 8. भवतः नास्ति फ. 9. विकल्पस्य–समानमूर्ध्नी नास्ति ह. 10. गां पञ्चदाम्नी क, एकमूर्ध्नी पञ्चमूर्ध्नी समानमूर्ध्नी ह. 11. नास्ति ब. क. 12. सञ्ज्ञाछन्दसोरिति किम्? पञ्चमूर्धा एकमूर्धा समानमूर्धा क. ड, समानमूर्ध्नी नास्ति ब. 13. च इत्यधिकम् क. 14. केवला–विजिग्ये नास्ति ब. 15. मामका फ. 16. अवरीकन्या मघवा निजिग्ये ड, उतापराभ्यः फ. 17. समानीं प्रतारणी ब.क.ड, समानी प्रकरणी ह. 18. या नास्ति फ, या रात्री सुसृष्टा रात्रीभिः ह. 19. रात्रिं रात्रिं सहोषित्वा इ. ड. फ.